**दिनाङ्क** :- 19.09.2026 **प्रात:** - 06:55

**अथवार्ताः**

**प्रधानमन्त्री - आजीविकामेलकम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य विंशतितमस्य रोजगार इति आजीविकामेलकस्य अन्तर्गतं विविधेषु प्रशासकीयेषु विभागेषु संस्थासु च नवनियुक्तेभ्यः युवभ्यः एकपञ्चाशत्सहस्राधिकानि नियुक्तिपत्राणि दृश्यश्रव्य-परान्तर्जालीय-माध्यमेन वितरिष्यति। प्रधानमन्त्री अस्मिन् अवसरे उपस्थितं जनसमूहम् अपि सम्बोधयिष्यति। इदम् आजीविकामेलकं देशस्य पञ्चचत्वारिंशत्स्थानेषु आयोजयिष्यते। नवनियुक्ताः अभ्यर्थिनः भारतप्रशासनस्य विभिन्नेषु मन्त्रालयेषु विभागेषु च कार्यभारं स्वीकरिष्यन्ति। एतेषु राजस्वविभागं, रेलमन्त्रालयं, गृहमन्त्रालयं, स्वास्थ्यपरिवारकल्याणमन्त्रालयं, वित्तीयसेवाविभागं, रक्षामन्त्रालयं च समेत्य अन्ये विभागाः सम्मिलिताः सन्ति।

**प्रधानमन्त्री - पर्यावरणसम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः नवदिल्ल्यां 'पर्यावरणस्य वातावरणगतिशीलतायाश्च भविष्यः' इत्यस्मिन् विषये आयोजितस्य अन्ताराष्ट्रियसम्मेलनस्य उद्घाटनं करिष्यति। द्विदिवसीयस्य अस्य सम्मेलनस्य आयोजनं राष्ट्रियहरिताधिकरणेन क्रियते। सम्मेलने पर्यावरणविशेषज्ञाः, सर्वोच्च-न्यायालयस्य उच्च-न्यायालयानां जनपद-न्यायालयानां च न्यायाधीशाः भागं ग्रहीष्यन्ति। विभिन्नमन्त्रालयानां सचिवाः वरिष्ठाः प्रशासकीयाधिकारिणश्च अपि कार्यक्रमे सहभागं करिष्यन्ति। सम्मेलने सप्तदशदेशेभ्यः प्रतिष्ठिताः न्यायाधीशाः न्यायिकप्रतिनिधयश्च सहभागं करिष्यन्ति।

**प्रधानमन्त्री - संयुक्तारबामीरातस्य राष्ट्रपतिः**

भारतं संयुक्तारबामीरातश्च प्रादेशिकशान्तेः, सुरक्षायाः स्थैर्यस्य च संवर्धनाय कृतेषु प्रयत्नेषु निरन्तरसहकारं समन्वयं च प्रति स्वकीयां प्रतिबद्धतां पुनः प्रकटितवन्तौ। प्रधानमन्त्रिणा नरेन्द्रमोदिना सह ह्यः संयुक्तारबामीरातस्य राष्ट्रपतिना शेखमोहम्मद-बिनजायद-अल्-नाह्यान् इत्यनेन दूरभाषेण सम्पर्कः कृतः। उभौ नेतारौ पश्चिमैशियायां प्रवर्तमानानां घटनाक्रमाणां विषये परस्परं विचारान् प्रकटितवन्तौ। उभाभ्यां देशाभ्यां व्यापक-सामरिक-सहमतिम् अधिकं सुदृढीकर्तुं ऊर्जा-रक्षा-प्रौद्योगिकी-निवेश-स्वास्थ्यान् च समेत्य नूतनेषु उपायेषु चर्चा कृता। संयुक्तारबामीरातस्य राष्ट्रपतिना प्रधानमन्त्रिणः नरेन्द्रमोदिनः जन्मदिवसस्य अवसरे हार्दिक्यः शुभकामनाः प्रदत्ताः तथा भारतस्य सफल-ब्रिक्स्-अध्यक्षतायै तस्य अभिनन्दनमपि कृतम्। प्रधानमन्त्री श्रीमोदी ब्रिक्स्-शिखरसम्मेलने शेखखालिदस्य सहभागितायै तथा भारतस्य अध्यक्षतायाः अन्तर्गतं महत्त्वपूर्णानां परिणामानां प्राप्तौ सति संयुक्तारबामीरातस्य सहयोगस्य सहमतेः च प्रशंसां कृतवान्।

**डूसू-निर्वाचनम्**

दिल्लीविश्वविद्यालय-छात्रसङ्घस्य निर्वाचनाय मतदानप्रक्रिया ह्यः सम्पन्ना। अस्मिन् निर्वाचने अष्ट षड् दशांशोत्तर एकोनचत्वारिंशत्-प्रतिशतं मतदानं पञ्जीकृतम्। मतदानं द्वयोः चरणयोः सम्पन्नम्। ध्यातव्यमिदं यत् अध्यक्ष-

उपाध्यक्ष-सचिव-संयुक्तसचिव चेत्येभ्यः पदेभ्यः मतदानं जातम्। मतगणना अद्य दिल्लीविश्वविद्यालयस्य उत्तरपरिसरे स्थितस्य विश्वविद्यालय-क्रीडाङ्गणस्य बहुउद्देशीय-सभागारे भविष्यति।

**एशियाक्रीडाः**

ऐषमः एशियाक्रीडामहोत्सवस्य विंशतितमस्य संस्करणस्य भव्योद्घाटनसमारोहः अद्य जापानदेशस्य आइचि-नागोयास्थिते पालोमा-मिजुहो-क्रीडाङ्गणे भारतीयसमयानुसारम् मध्याह्ने सार्धद्विवादने आरप्स्यते। द्विवारं ओलम्पिक्-पदकविजेत्री मनुभाकर् अथ तजिन्दरपालसिंहतूरः च उद्घाटनसमारोहे भारतस्य ध्वजवाहकौ भविष्यतः।

एशियाक्रीडाः अद्य आरभ्य अक्टूबर्-मासस्य चतुर्थदिनाङ्कपर्यन्तं प्रवर्तिष्यन्ते। अस्मिन् क्रीडामहोत्सवे सप्तत्रिंशत्-क्रीडासु पञ्चशताधिकाः भारतीयक्रीडकाः सहभागं करिष्यन्ति।

एशियायाः क्रीडामहोत्सवस्य एतस्मिन् संस्करणे पञ्चचत्वारिंशत्-देशानां प्रदेशानां च क्रीडकाः त्रिचत्वारिंशत्-क्रीडासु नवषष्ठ्यधिक-चतुश्शताधिक-पदकसम्बद्धस्पर्धासु सहभागं करिष्यन्ति। जापानदेशः तृतीयवारं अस्य क्रीडामहोत्सवस्य आतिथ्यं करिष्यति।

॥ **इति वार्ताः**॥